अनुरञ्जनं, क्ली, (अनु + रन्ज + भावे ल्युट् ।) अनुरागः । हर्षजननं । यथा,—“विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवरेति जयदेवः ॥ (प्रीतिजननं । आह्लादनं । आराधनं । “युक्तः प्रजानामनुरञ्जने स्यास्तस्मात् यशो यत् परमं धनं वः” । इति उत्तरचरिते ।)

अनुरतः, त्रि, (अनु + रम् + कर्त्तरि क्तः ।) अनुरागविशिष्टः । प्रीतः । अनुरक्तः । अनुपूर्व्वरमधातोः कर्त्तरि क्तः ॥

(“धर्म्मानुरतमत्यर्थं शान्तं सूनृतभाषिणम्” । इति भारते ।) ॥

अनुरतिः, स्त्री, (अनु + रम् + भावे क्तिन् ।) अनुरागः । इति हेमचन्द्रः ॥

अनुरागः, पुं, (अनु + रन्ज + भावे घञ् ।) प्रीतिः । आसक्तिः । तत्पर्य्यायः । रतिः २ रागः ३ अनुतिः ४ । इति हेमचन्द्रः ॥

(“कण्टकितेन प्रथयति मय्यनुरागं कपोलेन” । इति शाकुन्तले ।)

अनुरागी, [न्] त्रि, (अनु + रन्ज + कर्त्तरि घिनुण् कुत्वं निपातनात् नलोपश्च ।) अनुरागविशिष्टः । अनुरक्तः । इति शब्दरत्नावली ॥

अनुराधा, स्त्री, (राधां विशाखामनुगता, कुगतिप्रादयइति सूत्रेण समासः ।) सप्तदशनक्षत्रं । तस्या रूपं । सर्पाकृतिसप्ततारामयं । इति कालिदासः । “बलिनिभताराचतुष्टयात्मकं” । इति दीपिकाटीका । अस्या अधिदेवता मित्रः । तत्र जातफलं । यथा,—

“सत्कीर्त्तिकान्तिश्च सदोत्सवःस्या-
ज्जेता रिपूणाञ्च कलाप्रवीणः ।
स्यात्सम्भवे यस्य किलानुराधा
सम्पत्प्रमादौ विविधौ भवेतां ॥”

इति कोष्ठीप्रदीपः ॥

अनुरूपः, त्रि, (रूपमनुगतः प्रादिसमासः ।) तुल्यरूपः । सदृशः । यथा,—

“देवानामनुरूपा हि चरन्त्येते महीतले” । इति रामायणं ॥ (तुल्यगुणः । योग्यः ।

“तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः” । इति रघुवंशे ।) ॥

अनुरोधः, पुं, (अनु + रुध् + घञ् ।) आराध्यादेरिष्टसम्पादनं । उपरोधः । (“तदनुरोधात् कठोरगर्भामपि वधूं जानकीं विमुच्य गुरुजनस्तत्र गतः” । इति उत्तरचरिते ।) तत्पर्य्यायः । अनुवर्त्तनं २ । इत्यमरः ॥

अनुलापः, पुं, (अनु वारं वारं लपनं, अनु + लप् + भावे घञ् ।) पुनः पुनः कथनं । पुनरुक्तिः । इत्यमरः ॥

अनुलेपनं, क्ली, (अनु + लिप् + भावे ल्युट् ।) गात्रे गन्धद्रव्यादिलेपनं । तद्द्रव्यञ्च । तस्य गुणाः । प्रीत्योजःशुक्रवृद्धिकारित्वं । घर्म्मदौर्गन्ध्यतन्द्रातापश्रमनाशित्वञ्च । इति राजवल्लभः ॥ (“निरस्तमाल्याभरणानुलेपनाः” । इति ऋतुसंहारे ।)

अनुलोमः, पुं, (अनुपूर्व्वात् लोमशब्दात् अच्, प्रत्यन्वेति अच् ।) यथाक्रमं । अविलोमः । यथा,—

“वर्णमाला समाख्याता अनुलोमविलोमिका” । इति तन्त्रसारे नारदवचनं ॥ (क्रमानुगतः । अनुकूलः ।

“जड़ानप्यनुलोमार्थान् प्रवाचः कृतिनां गिरः” । इति शिशुपालबधे ।)

अनुलोमजः, त्रि, (अनुलोमेन यथाक्रमेण जातः, अनुलोम + जन + डः, उपपदसमासः) । अनुलोमजातः । अप्रतिलोमजः । यथा । ब्राह्मणात् क्षत्रियागर्भजातः । क्षत्रियात् वैश्यायां जातः । इत्यादि उत्तमादधमायां जातः । यथा,—

“सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः ।
अन्योऽन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः” ॥

इति मनुः ॥

अनुवत्सरः, पुं, (अनुकूलोवत्सरः, दानादिविशेषाय ।) वर्षः । इति हेमचन्द्रः ॥ संवत्सरादिपञ्चकान्तर्गतवत्सरविशेषः । अस्मिन् वर्षे धान्यदाने महाफलं । शकाब्दात् पञ्चभिर्हृते यः शेषस्तिष्ठति तेन एकादिक्रमेण सं-परि-इदा-अनु-उदा-पूर्व्वकवत्सरसंज्ञका वत्सरा भवन्ति । इति मलमासतत्त्वं ॥

अनुवर्त्तनं, क्ली, (अनु + वृत् + भावे ल्युट् ।) अनुरोधः । इत्यमरः ॥ व्याकरणमते पूर्व्वसूत्रस्थितपदादेरनुवृत्तिः ॥ (पश्चाद्गमनं । अनुसरणं । “इदानीं तदाज्ञानुवर्त्तनं उचितम्” । इति हितोपदेशः ।)

अनुवाकः, पुं, (अनूच्यते अनु + वच् + घञ्, कुत्वं ।) ऋग्यजुःसामसमूहः । इत्यमरः ॥ वेदविशेषः । इति सुभूतिः ॥ (“जेतुं जैत्रानथ खलु जपन् सूक्तसामानुवाकान्” । इति महावीरचरिते ।)

अनुवादः, पुं, (अनु + वद् + घञ् ।) कुत्सितार्थवाक्यं । इति शब्दरत्नावली ॥ पुनरुक्तिः । उक्तस्य पुनः कथनं । यथा,—

“विरोधे गुणवादः स्यादनुवादोऽवधारिते ।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः” ॥

इति शुद्धितत्त्वटीका ॥ वाचारम्भनमात्रं । यथा,—

“विनानुवादं न च तन्मनीषितं
सम्यग्यतस्त्यक्तमुपाददत् पुमान्” ।

इति श्रीभागवतं ॥

अनुवासनं, क्ली, (अनु + वास + सौरभे भावे ल्युट् ।) स्नेहनं । धूपनं । इति हेमचन्द्रः ॥ स्नेहवस्तिः । यथा,—

“अथानुवासनं स्नेहवस्तिधूपनयोरपि” । इति मेदिनी ॥

“द्विधा वस्तिः परिज्ञेयो निरूहश्चानुवासनं ।
कषायाद्यैर्निरूहः स्यात् स्नेहाद्यैरनुवासनं” ॥

इति वैद्यकं ॥

अनुवृत्तिः स्त्री, (अनु + वृत् + क्तिन् । अनुवर्त्तनं । अनुरोधः । इति । हेमचन्द्रः । व्याकरणमते,—

“पूर्व्वसूत्रस्थितपदस्य परसूत्रेषूपस्थितिः” । तत्पर्य्यायः । अधिकारः २ । सा त्रिविधा यथा,—

“सिंहावलोकिताख्या च मण्डूकप्लुतिरेव च ।
गङ्गास्रोत इति ख्यातः अधिकारास्त्रयो मताः” ॥

सिंहावलोकितो यथा । वावगोर्दान्ते इत्यस्माद् दान्त इति पदस्य ऋत्स्वमिद्यन्तेषूपस्थितिः ॥ मण्डूकप्लुतिर्यथा । टा भिस् ङे ङसीत्यस्माद् अत इति पदस्य आङ्किमभवीत्यत्रोपस्थितिः ॥ गङ्गास्रोतो यथा । सेः सि ओ जसित्यस्माद् सेरिति पदस्य तद्धितपर्य्यन्तेषूपस्थितिः ॥ इति मुग्धबोधटीकायां दुर्गादासः ॥ (अनुवर्त्तनं । अनुसरणं । अनुमोदनं । अनुरञ्जनं ।

“अमङ्गलाभ्यासरतिं विचिन्त्यतं
तवानुवृत्तिं न च कर्त्तुमुत्सहे” ।

इति कुमारसम्भवे । अनुकरणं । “यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा” । इति साहित्यदर्पणे ।

“कान्तानुवृत्तिचातुर्य्यमपि अनुशिक्षितं वत्सेन” । इति उत्तरचरिते ।)

अनुव्रजनं, क्ली, (अनु + व्रज + भावे ल्युट् ।) अनुव्रज्या । गृहागतानां शिष्टानां गमनसमये कियद्दूरपर्य्यन्तपश्चाद्गमनरूपशिष्टाचारः । आग बाड़ान इति भाषा । यथा,—

“आयान्तमग्रतो गच्छेत् गच्छन्तं तमनुव्रजेत्” । इति तन्त्रसारे निगमकल्पद्रुमः ॥

अनुशयः, पुं, (अनु + शी + भावे अच्, शयं दृष्टमनुगतः प्रादिसमासः, कृत्तानुगते त्रि ।) दीर्घद्वेषः । पूर्व्ववैरता । अनुतापः । इत्यमरः । (“अनुशयादनुरोदिमि चोत्सुकः” । “अनुशयदुःखायेदं हतहृदयं सम्प्रति विबुद्धम्” । इति शाकुन्तले ।) द्वेषः । अनुबन्धः । इति मेदिनी ॥ (क्रोधः । पश्चात्तापादिकारणात् विप्रतिपत्तिः । यथा,—

“क्रयविक्रयानुशयो विवादः स्वामिपालयोः” । इति मनुः ।)

अनुशयाना, स्त्री, (अनु + शी + शानच्, अनुतापकर्त्तरि त्रि ।) परकीयान्तर्गतनायिकाभेदः । तस्या लक्षणं । इष्टहानिजनितानुतापवती । सा त्रिधा । वर्त्तमानसङ्केतस्थानविघट्टनेन १ भाविसङ्केतस्थानाभावशङ्कया २ स्वाधिष्ठितसङ्केतस्थाने भर्त्तुर्गमनानुमानेन ३ । इति रसमञ्जरी ।

अनुशयी, स्त्री, (अनुशय्यते अनुतप्यतेऽनया, अनु + शी + अच्, गौरादित्वात् ङीष् ।) क्षुद्ररोगान्तर्गतपादरोगविशेषः । तस्य लक्षणं । यथा,—

“गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थितां ।
पादस्यानुशयीं तान्तु विद्यादन्तःप्रपाकिनीं” ॥

इति माधवकरः ॥ तच्चिकित्सा यथा,—

“हरेदनुशयीं वैद्यः क्रियया श्लेष्मविद्रधेः” ।

इति भावप्रकाशः ॥

अनुशयी, [न्] त्रि, (अनु + शी + इनि ।) दण्डवत्प्रणामैश्चरणमूले शेते यः । यथा । “यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा” । इति श्रीभागवतं ॥ (अत्यर्थमासक्तः । अनुरक्तः । पश्चात्तापयुक्तः । अनुशोचनपरः ।)

अनुशरः, पुं, (अनुशृणाति हिनस्ति, अनु + शॄ + पचाद्यच् ।) राक्षसः । इति शब्दमाला ॥